N.A.
Purvacharit
पूर्वाचारित
Sanskrit
Paper – Printed
N.A. (very old).
28 folio
10.4"×4.7"
complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

೬೦೨೬೦

೨೯೦

ರುದ್ರಃ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ ॥ अद्यपूर्वोच्चारितएवंगुणविशेषणविशिष्टा
यां शुभपुण्यतिथौममआत्मनः सकलशास्त्रश्रुतिस्मृतिपुराणोक्तफ
लप्राप्त्यर्थं अमुककामनासिद्ध्यर्थं अमुकद्रव्येण श्रीभवानीशंकरदे
वताप्रीत्यर्थं अमुकरुद्राभिषेकमहंकरिष्ये॥तदंगतयाविहितंशरीरशु
द्ध्यर्थंलघुषडंगन्यासांश्चकरिष्ये ॥ मनोजूतिरितिमंत्रस्य बृहस्पति
र्ऋषिः ॥ बृहस्पतिर्देवता॥बृहतीछन्दः॥हृदयन्यासेजपेविनियोगः ॥
ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं
य्यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासइहमादयन्तामों ३ प्रतिष्ठ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० ॐ हृदयायनमः ॥ १ ॥ अबोध्यग्निरितिमंत्रस्यबुधगविष्ठिराऋ अ०
१ षिः अग्निर्देवतात्रिष्टुप्छंदः शिरोन्यासेजपेविनियोगः ॥ ॐ अबो १
ध्यग्निःसमिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ यह्वाऽइव
प्प्रवयामुज्जिहानाःप्प्रभानवःसिस्रतेनाकमच्छ ॥ ॐशिरसेस्वा
हा ॥ २ ॥ मूर्द्धानमितिमंत्रस्य भरद्वाजऋषिःअग्निर्देवतात्रिष्टुप्छंदः ॥
शिखान्यासेजपेविनियोगः॥ॐमूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वान
रमृतऽआजातमग्निम् ॥ कविंसम्राजमतिथिञ्जनानामासन्नापा १
त्रंजनयन्तदेवाः ॥ ॐ शिखायैवषट् ॥ ३ ॥ मर्माणितइतिमंत्रस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अप्रतिरथऋषिः मर्माणिदेवता॥विराट्छंदः कवचन्यासेजपेविनियो
गः॥ॐमर्म्माणितेवर्म्मणाछादयामिसोमस्त्वाराजामृतेनानुवस्ताम्
॥ उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु॥ ॐकवचाय
हुम् ॥ ४ ॥ विश्वतश्चक्षुरितिमंत्रस्यविश्वकर्माभौवनऋषिः विश्वकर्मा
देवतात्रिष्टुप्छंदः नेत्रन्यासे जपेविनियोगः ॐ विश्वतश्चक्षुरुतवि
श्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसं
म्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ ॐ नेत्रत्रयायवौषट् ॥५॥मान
स्तोकइतिमंत्रस्यपरमेष्ठीऋषिः एकरुद्रोदेवता जगतीछंदः अस्त्रन्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० सेजपेविनियोगः ॥ ॐ मानंस्तोकेतनंयेमानुऽआयुंषिमानोगोषुमा अ०
२ नोऽअश्वैषुरीरिषः ॥ मानौवीरान्नुंद्रभामिनौवधीर्हुविष्मंन्तुःसदामि १
त्त्वांहवामहे॥ॐअस्त्रायफट्॥६॥ ॥श्रीगणेशायनमः॥ हरिःॐगुणा
नांन्त्वागुणपंतिर्ठंहवामहे प्प्रियाणांन्त्वाप्प्रियपंतिर्ठंहवामहेनिधीना
न्त्वांनिधिपतिर्ठंहवामहेवसोमम ॥आहमंजानिगर्भमाधमात्त्वमंजासि
गर्भमाधम्॥१॥गायत्रीत्रिष्टुब्जगंत्यनुष्टुप्पंत्क्त्यासुह॥बृहुत्युष्णिहांकुकु
प्प्सूचीभिः शम्म्यन्तुत्त्वा ॥२॥ द्विपंदायाश्चतुंष्पदास्त्रिपंदायाश्चषु २
ट्पंदाः ॥ विच्छंन्दायाश्चुसच्छंन्दाःसूचीभिः शम्म्यन्तुत्त्वा ॥ ३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सहस्तोमाः सहच्छन्दसऽआवृतः सहप्रमाऽऋषयः सप्त दैव्याः ॥ पूर्वे
षाम्पन्थामनुदृश्य धीराऽअन्वालेभिरे रथ्यो न रश्मीन् ॥४॥ यज्जाग्रतो दूर
मुदैति दैवन्तदु सुप्तस्य तथैवैति ॥ दूरङ्गमं ज्योतिषाञ्ज्योतिरेकन्तन्मे
मनः शिवसङ्कल्पमस्तु ॥ ५ ॥ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्व
न्ति विदथेषु धीराः ॥ यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवसङ्क
ल्पमस्तु ॥ ६ ॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजा
सु ॥ यस्मान्नऽऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु
॥७॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्वम् ॥ येन यज्ञ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० स्तायतैसुप्तस्यतथैवैतितन्नेमनः शिवसंङ्कल्पमस्तु ॥ ८॥ यस्मिन्नृचः अ०
३ सामयजूᳪषियस्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्मिँश्चित्त २
ᳪसर्वमोतम्प्रजानान्तन्नेमेमनः शिवसंङ्कल्पमस्तु ॥ ९ ॥ सुषारथिर
श्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदं
जिरंजविष्ठन्तन्नेमेमनः शिवसंङ्कल्पमस्तु ॥ १० ॥ इतिरुद्रेप्रथमोऽ
ध्यायः॥१॥हरिः ॐसहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥सभूमिᳪ
सर्वतस्पृत्वात्यतिष्ठद्दशांगुलम् ॥१॥ पुरुषएवेदᳪसर्वंयद्भूतंयच्चभा ३
व्यम्॥उतामृतत्वस्येशानोयदन्नेनातिरोहति॥२॥एतावानस्यमहिमा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तोज्यायाँश्च पूरुषः ॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्सा
शनानशनेऽअभि ॥ ४ ॥ ततो विराडजायत विराजोऽअधिपूरुषः ॥ स
जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्वहुतः
सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये
॥ ६ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छन्दाᳬंसि ज
ज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वाऽअजायन्त ये के
चोभयादतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० तंय्यज्ञम्बर्हिषिप्प्रौक्षुन्पुरुषञ्जातमंग्ग्रुतः ॥ तेनंदेवाऽअंयजन्तसाद्ध्या अ०
४ ऋषंयश्श्चुये ॥ ९ ॥ यत्पुरुषंव्व्यदंधुःकतिधाव्व्यंकल्प्पयन् ॥ मुख २
ङ्किमंस्यासीत्किम्बाहूकिमूरूपादांऽउच्च्येते ॥ १० ॥ ब्राह्मणोस्य
मुखंमासीद्बाहूरांजन्न्यः कृतः ॥ ऊरूतदंस्ययद्वैश्यंः पद्भ्याꣳशूद्रोऽअं
जायत ॥ ११ ॥ चन्द्रमामनंसोजातश्श्चक्षोःसूर्य्योऽअजायत ॥ श्रोत्रां
द्वायुश्श्चंप्प्राणश्श्चमुखांदग्निरंजायत ॥ १२ ॥ नाब्भ्यांऽआसीदन्तरिक्ष
ꣳशीर्ष्णोद्यौःसमंवर्त्तत ॥ पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथांलोकाँ२ऽअंक ४
ल्प्पयन् ॥ १३ ॥ यत्पुरुषेणहविषांदेवायज्ञमतंन्वत ॥ वसन्तोऽस्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सीदाज्ज्यंग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः
सप्तसमिधः कृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषंपशुम् ॥ १५ ॥
यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्म
हिमानः सचन्तयत्रपूर्वेसाध्याः सन्तिदेवाः ॥ १६ ॥ अद्भ्यः सम्भृतः
पृथिव्यैरसाच्चविश्वकर्म्मणः समवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमे
तितन्मर्त्यस्यदेवत्वमाजानमग्रे ॥ १७ ॥ वेदाहमेतम्पुरुषम्महान्त
मादित्यवर्णन्तमसः परस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यः
पन्थाविद्यतेऽयनाय ॥ १८ ॥ प्रजापतिश्चरतिगर्ब्भेऽअन्तरजायमानो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० बहुधाविजायते ॥ तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुव अ०
५ नानिविश्वा ॥ १९ ॥ योदेवेभ्यऽआतपतियोदेवानाम्पुरोहितः ॥ २
पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥ रुचम्ब्राह्मञ्जनय
न्तोदेवाऽअग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे
॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्वि
नौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥ २२ ॥
इतिरुद्रेद्वितीयोऽध्यायः ॥२॥ हरिः ॐ आशुः शिशानोवृषभोनभीमोघ ५
नाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरः शतꣳसेनाऽ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अजयत्साकमिन्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेण
दुश्च्यवनेनधृष्णुना । तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेन
वृष्णा ॥ २ ॥ सऽइषुहस्तैःसनिषङ्गिभिर्वशीसंस्रष्टासयुधऽइन्द्रोगणेन ॥ सं
सृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता ३ बृहस्पतेप
रिदीयारथेनरक्षोहामित्राँऽअपबाधमानः ॥ प्रभञ्जन्सेनाःप्रमृणो
युधाजयन्नस्माकमेध्यवितारथानाम् ॥ ४ ॥ बलविज्ञायस्थविरःप्र
वीरःसहस्वान्वाजीसहमानऽउग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजा
जैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ५ ॥ गोत्रभिदंगोविदंवज्रबाहुंजयं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 

न्तमज्ज्मंप्प्रमृणन्तमोजसा ॥ इमꣳसंजाताअनुंवीरयध्ध्वमिन्द्रꣳस
खायोऽअनुसꣳरंभद्ध्वम् ॥ ६ ॥ अभिगोत्त्राणिसहंसागाहंमानोदयोवी
रःश्शतमंन्न्युरिन्द्रंः ॥ दुश्श्च्यवनःपृतंनाषाडयुद्ध्योस्माकꣳसेनाऽअ
वतुप्प्रयुत्त्सु ॥ ७ ॥ इन्द्रंऽआसान्नेताबृहस्प्पातिर्दक्षिणायज्ञःपुरऽएंतु
सोमंः ॥ देवसेनानांमभिभञ्जतीनाञ्जयंन्तीनाम्मरुतोंयन्त्वग्ग्रंम् ॥
॥८॥ इन्द्रंस्यवृष्ण्णोवरुंणस्यराज्ञंऽआदित्त्यानांम्मरुताꣳशर्द्धंऽउग्ग्र
म् ॥ महामंनसाम्भुवनच्च्यवानाङ्घोषोंदेवानाञ्जयंतामुदंस्त्थात् ॥ ९ ॥
उद्धंर्षयमघवन्नायुंधान्युत्सत्त्वंनाम्मामकानाम्मनांꣳसि ॥ उद्वृंत्र

हन्वाजिनांवाजिन्नान्युद्रथांनाञ्जयंताँय्यन्तुघोषाः ॥ १० ॥ अस्म्मा
कमिन्द्रःसमृतेषुध्वजेष्ष्वस्माकंय्याऽइषवस्ताजंयन्तु ॥ अस्म्मा
कंवीराऽउत्तंरेभवन्त्वस्स्माँरऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषां
श्चित्तम्प्रतिलोभयंन्तीगृह्णाणङ्गांन्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्द्दहहृ
त्सुशोकैरन्धेनामित्रास्तमंसासचन्ताम् ॥ १२ ॥ अवंसृष्टापरांपत
शरंव्येब्रह्मंसंशिते ॥ गच्छामित्रान्प्रपंद्यस्वमामीषाङ्कञ्चनोच्छिषः
॥ १३ ॥ प्रेताजयंतानरऽइन्द्रोवःशर्म्मयच्छतु ॥ उग्ग्रावंःसन्तुबाहवो
नाधृष्ष्यायथासंथ ॥ १४ ॥ असौयासेनामरुतःपरेषामभ्यैतिनऽ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओजंसुस्पर्द्धमाना ॥ ताङ्गूंहतुतमुसार्पव्रतेनुयथुामीऽअन्योऽअ
न्यन्नजानन् ॥ १५ ॥ यत्रबाणाःसुम्पतन्तिकुमाराविशिखाऽइव ॥ त
न्नइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु ॥ १६ ॥
मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उ
रोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥ इतिरुद्रेतृ
तीयोऽध्यायः ॥ ३ ॥ हरिः ॐ विभ्राड्बृहत्पिबतुसोम्म्यम्मध्वा
युर्द्दधद्यज्ञपतावविहुतम् ॥ वातजूतोयोऽअभिरक्षतित्मनाप्रजाः ७
पुपोषपुरुधाविराजति ॥ १ ॥ उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दृशेविश्वायसूर्य्यम् ॥ २ ॥ येनापावकचक्षसाभुरण्यन्तञ्ज
नाँ२ अनु ॥ त्वंवरुणपश्यसि ॥ ३ ॥ दैव्यावध्वर्य्यूऽआगतᳫं
रथेनसूर्य्यत्त्वचा ॥ मध्वायज्ञᳫंसमञ्जाथे ॥ तम्प्रत्नथायंवेनश्चित्र
न्देवानाम् ॥ ४ ॥ तम्प्रत्नथापूर्वथाविश्वथेमथाज्ज्येष्ठताति
म्बर्हिषदᳫंस्वर्विदम् ॥ प्रतीचीनंवृजनन्दोहसेधुनिमाशुजयन्तमनु
यासुवर्द्धसे ॥ ५ ॥ अयंवेनश्चोदयत्पृश्निगर्भाज्ज्योतिर्ज्जरायूर
जसोविमाने ॥ इममपाᳫंसंगमेसूर्य्यस्यशिशुन्नविप्रामतिभीरिह
न्ति ॥ ६ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु॰ आप्प्रा द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्ष॒ꣳ सूर्य्य॑ऽआ॒त्मा जग॑तस्त॒स्थुष॑श्च ॥ अ॰

८ ॥ ७ ॥ आ न॒ऽइडा॑भिर्वि॒दथे॑ सुश॒स्ति वि॒श्वान॑रः सवि॒ता दे॒वऽए॑तु ॥ अ ४

पि॒ यथा॑ युवानो॒ मत्स॑था नो॒ विश्वं॒ जग॑दभिपि॒त्वे म॑नी॒षा ॥ ८ ॥ यद॒द्य क

च्च॑ वृत्रहन्नु॒दगा॑ऽअ॒भि सू॑र्य्य ॥ सर्वं॒ तदि॑न्द्र ते॒ वशे॑ ॥ ९ ॥ त॒रणि॑र्वि॒श्व

द॑र्शतो ज्योति॒ष्कृद॑सि सूर्य्य ॥ विश्व॒मा भा॑सि रोच॒नम् ॥ १० ॥ त

त्सूर्य्य॑स्य देव॒त्वं तन्म॑हि॒त्वं म॒ध्या कर्त्तो॒र्वित॑त॒ꣳ सं ज॑भार ॥ य॒देद

यु॑क्त ह॒रितः॑ स॒धस्था॒दाद्रात्री॒ वास॑स्तनुते सि॒मस्मै॑ ॥ ११ ॥ तन्मि॒त्र ८

स्य॒ वरु॑णस्याभि॒चक्षे॒ सूर्य्यो॑ रू॒पं कृ॑णुते॒ द्योरु॒पस्थे॑ ॥ अ॒न॒न्तम॒न्यद्रु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंदस्यपाजं÷कृष्णमुन्यद्धुरितःसम्भंरन्ति ॥ १२ ॥ वण्मुहाँ २ अं
सिसूर्ष्युबडांदित्यमुहाँ २ अंसि ॥ मुहस्तैसुतोमंहिमापंनस्यतेद्धादेव
मुहाँ २ अंसि ॥ १३ ॥ बट्सूर्ष्युश्रवंसामुहाँ २ अंसिसुत्रादेवमुहाँ २
अंसि ॥ मुन्हादेवानांमसुर्ष्य÷पुरोहितोविभुज्ज्योतिरदाभ्यम ॥
॥ १४ ॥ श्रायंन्तऽइवुसूर्ष्युंविश्वेदिन्द्रस्यभक्षत ॥ वसूंनिजातेज
नंमानुऽओजंसाप्प्रतिंभागन्नदींधिम ॥ १५ ॥ अद्याद्देवाऽउदिंतु
सूर्ष्यस्युनिरंहंसःपिपृतानिरंवुद्यात् ॥ तन्नोमित्रोवरुणोमामहन्तु
मदिंतिःसिन्धुं÷पृथिवीऽउतद्यौः॥१६॥ आकृष्णेनुरजंसावर्त्तमानोनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२० वेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसविता रथेनादेवोयातिभुवनानि अ०
१ पश्यन् ॥ १७ ॥ इतिरुद्रेचतुर्थोऽध्यायः ॥४॥ हरिःॐनमस्तेरुद्रमन्य ५
वऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ यातेरुद्रशिवात
नूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचा
कशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥शिवाङ्गिरित्र
ताङ्कुरुमाहिꣳसीःपुरुषञ्जगत् ॥ ३ ॥ शिवेनवचसात्वागिरिशा
च्छावदामसि ॥ यथानःसर्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥ ४ ॥ १
अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहीँश्चसर्वाञ्जम्भय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्तसर्वाँ२श्चयातुधान्न्योधराचीःपरासुव ॥५॥ असौयस्ताम्म्रोऽअरुणऽ
उतबब्भ्रुःसुमङ्गलः ॥ येचैनꣳरुद्राअभितोदिक्षुश्रिताःसहस्रशो
वैषाꣳहेडईमहे ॥ ६ ॥ असौयोवसर्पतिनीलग्ग्रीवोविलोहितः ॥ उतै
नंगोपाऽअदृश्रन्नदृश्रन्नुदहाय्र्यःसदृष्टोमृडयातिनः ॥७॥ नमोस्तुनी
लग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्त्वानोहन्तेब्भ्योकर
न्नमः ॥ ८ ॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरात्न्न्योर्ज्ज्याम् ॥ याश्चतेह
स्तऽइषवःपराताभगवोवप ॥ ९ ॥ विज्ज्यन्धनुःकपर्द्दिनोविशल्ल्यो
बाणवाँ२उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० स्यातेहेतिर्म्मीढुष्टमहस्तेबभूवँतेधनुः ॥ तयास्मान्विश्वतस्त्वमय अ०
१० क्ष्मयापरिभुज ॥ ११ ॥ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः ५
॥ अथोयइषुधिस्तवारेऽअस्मन्निधेहितम् ॥ १२ ॥ अवतत्यधनु
ष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनःसुमना
भव ॥ १३ ॥ नमस्तऽआयुधायानाततायधृष्णवे ॥ उभाभ्यामु
ततेनमोबाहुभ्यान्तवधन्वने ॥ १४ ॥ मानोमहान्तमुतमानोऽअ
र्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मानोवधीःपितरम्मोत १०
मातरम्मानःप्रियास्तन्वोरुद्ररीरिषः ॥ १५ ॥ मानस्तोकेत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नंयेमानऽआयुंषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रु
द्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥ १६ ॥ नमोहिर
ण्यबाहवे । सेनान्येदिशाञ्चपतयेनमोनमोवृक्षेभ्योहरिकेशेभ्यः
पशूनाम्पतयेनमोनमःशष्पिञ्जरायत्विषीमतेपथीनाम्पतयेनमोन
मोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशाय ॥ १७ ॥
नमोबभ्लुशाय । व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्यैजगता
म्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमःसूतायाह
न्त्यैवनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहिताय । स्थप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० तयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृतायौषधीनाम्पतयेन अ०
११ मोनमोमन्त्रिणेवाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्रन्द ९
यतेपत्तीनाम्पतयेनमोनमःकृत्स्नायतया ॥ १९ ॥ नमः
कृत्स्नायतया । धावतेसत्त्वनाम्पतयेनमोनमःसहमानायनिव्याधि
नऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्प
तयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमोनमोवञ्चते ॥
॥ २० ॥ नमोवञ्चते । परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽ ११
इषुधिमतेतस्कराणाम्पतयेनमोनमःसृकायिभ्योजिघांसद्भ्योमु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्णुताम्पतंयेनमोनमोसिमद्भ्योनक्तुश्चरंद्भ्योविकृन्तानाम्पतंयेन
मं÷ ॥ २१ ॥ नमंऽउष्णीषिणें । गिरिचरायंकुलुञ्चानाम्पतंन
मोनमंऽइषुमद्भ्योधन्वायिभ्यंश्चवोनमोनमंऽआतन्वानेभ्यं÷
प्प्रतिदधानेभ्यश्चवोनमोनमंऽआयच्छद्भ्योस्यंद्भ्यश्चवोनमोन
मोविसृजद्भ्यं÷ ॥ २२ ॥ नमोविसृजद्भ्योविद्ध्यंद्भ्यश्चवोनमो
नमं÷स्वपद्भ्योजाग्ग्रंद्भ्यश्चवोनमोनमंःशयानेभ्यऽआसीनेभ्य
श्चवोनमोनमस्तिष्ठंद्भ्योधावंद्भ्यश्चवोनमोनमं÷सभाभ्यं÷ ॥ २३ ॥
नमं÷सभाभ्यं÷ । सभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वंप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० तिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविविध्यन्तीभ्यश्चवोनमोन अ०
१२ मऽउगणाभ्यस्तृꣳहतीभ्यश्चवोनमोनमोगणेभ्यः ॥ २४ ॥ नमोग १६
णेभ्यो। गणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोन
मोनमोगृत्सेभ्योगृत्सपतिभ्य श्चवोनमोनमोविरूपेभ्योविश्वरूपे
भ्यश्चवोनमोनमःसेनाभ्यः ॥ २५ ॥ नमःसेनाभ्यः। सेनानिभ्यश्च
वोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनमःक्षत्तृभ्यः संग्रहीतृ
भ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्ष १२
भ्यः। नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यः कर्म्मा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेभ्यश्चवोनमोनमोनिषादेभ्यः ॥ पुञ्जिष्ठेभ्यश्चवोनमोनमः श्वनि
भ्योमृगयुभ्यश्चवोनमोनमः श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः । श्वपति
भ्यश्चवोनमोनमोभवायचरुद्रायचनमः शर्वायचपशुपतयेचनमोनी
लग्रीवायचशितिकण्ठायचनमः कपर्दिने ॥ २८ ॥ नमः कपर्दिने ।
चव्युप्तकेशायचनमः सहस्राक्षायचशतधन्वनेचनमोगिरिशयाय
चशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥
नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसवृधे
चनमोऽग्र्यायचप्रथमायचनमऽआशवे ॥ ३० ॥ नमऽआशवे । चा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

२० जिरायंचुनमुःशीघ्र्यायचुशीभ्यांयचुनमुऽऊर्म्म्यायचावस्वुन्यांय ३०
१३ चुनमोनादेयायंचुद्वीप्यांयच ॥ ३१ ॥ नमोज्ज्येष्ठाय । चक ६
निष्ठायंचुनमः पूर्वुजायंचापरुजायंचुनमोमद्ध्युमायंचापगुल्भायंचु
नमोजघुन्न्यायचबुध्न्यायचुनमुःसोभ्याय ॥ ३२ ॥ नमुःसो
भ्याय । चप्प्रतिसुर्ज्यायचुनमोयाम्म्यायचुक्षेम्म्यायचुनमुःश्लो
क्यायचावसान्न्यायचुनमऽउर्वुर्ज्यायचुखल्ल्यायचुनमोवन्न्याय ॥
॥ ३३ ॥ नमोवन्न्यायचुकक्ष्यायचुनमः श्रवायचप्प्रतिश्रुवा १३
यंचुनमऽआशुषेणायचाशुरथायचुनमुः शूरायचावभिंदतेचुनमोवि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ल्मिनै ॥ ३४ ॥ नमौंबिल्मिमनै । चकवचिनैंचुनमौंवर्म्मिणेंच
वरूथिनैंचुनमं÷श्रुतायंचश्रुतसेनायंचुनमौंदुन्दुभ्यायचाहनन्यायचु
नमौंधृष्णवै ॥ ३५ ॥ नमौंधृष्णवे । चप्प्रमृशायंचुनमौंनि
षङ्गिणेंचेषुधिमतेंचुनमंस्तीक्ष्णेषवेचायुधिनैंचुनमं÷स्वायुधायंचसुध
न्वनेच ॥ ३६ ॥ नमुःस्रुत्यांय । चुपत्थ्यांयचुनमुःकाट्यांयचु
नीप्प्यांयचुनमुःकुल्ल्यांयचसरस्यायचुनमौंनादेयायंचवैशुन्तायंचु
नमुःकूप्प्यांय ॥ ३७ ॥ नमुःकूप्प्यांयचावट्यायचुनमौंवीध्र्यां
यचातुप्प्यायचुनमौमेग्घ्यांयचाविद्युत्त्यायचुनमौवर्ष्यांयचावर्ष्यां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० यंचुनमोवात्त्यांय ॥ ३८ ॥ नमोवात्त्यांय । चुरेष्म्म्यांयचु अ०
१४ नमोंवास्तुव्यायचवास्तुपायंचुनमुःसोमांयचरुद्रायंचुनमंस्ताम्म्राय ६
चारुणायंचुनमंः शुङ्गवे ॥ ३९ ॥ नमंः शुङ्गवे । चपशुपतंये
चुनमंऽउग्ग्रायंचभीमायंचुनमोग्ग्रेवुधायंचदूरेवुधायंचुनमोहन्त्रेचुह
नींयसेचुनमोवृक्षेभ्म्योहरिंकेशेभ्म्योनमंस्ताराय ॥ ४० ॥ नमंः श
म्भुवायं । चमयोभुवायंचुनमंः शंकुरायंचमयस्कुरायंचुनमंः शि
वायंचशिवतंरायच ॥ ४१ ॥ ॥ नमुःपार्य्यांय । चावार्य्यांय १४
चुनमंः प्प्रुतरंणायचोत्तरंणायचुनमुस्तीर्त्थ्यांयचुकूल्ल्यांयचुनमुः श

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्प्यांयचुफेन्न्यांयचुनमंः सिकुत्त्यांय ॥ ४२ ॥ नमंः सिकुत्त्यां
य । चप्प्रवाह्यायचुनमंः किंठशिलायंचुक्षयंणायचुनमंः कपर्दिनेचपु
लुस्तयेचुनमंऽइरिण्यांचप्प्रपत्थ्यांयचुनमोव्रज्ज्यांय ॥ ४३ ॥
नमोव्रज्ज्यांय । चुगोष्ठ्यांयचुनमुस्तल्प्प्यांयचुगेह्यांयचुनमों
हृदुष्यांयचनिवेष्प्यांयचुनमुःकाटच्यांयचगह्वरेष्ठायंचुनमुःशुष्क्यां
य ॥ ४४ ॥ नमुःशुष्क्यांय । चहरित्त्यांयचुनमंः पांॅसुव्यांय
चरजुस्यायचुनमोलोप्प्यांयचोलुप्प्यांयचनमुऽऊर्व्यांयचुसूर्म्यांय
चुनमंः पुर्णांयं ॥ ४५ ॥ नमंः पुर्णांयं । चपर्णशुदायंचुनमंऽउ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० द्गुरमाँणायचाभिघ्नतेचनमंऽआखिदतेचंप्प्रखिदतेचनमंऽइषुकृद्भ्यो अ०
१५ धनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानांहृदयेभ्योनमो ५
विचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमंऽआनिर्हतेभ्यः ॥ ४६ ॥
द्रापेऽअन्धसस्पतेदरिद्रनीललोहित ॥ आसाम्प्रजानामेषाम्पशूना
म्माभेर्म्मारोङ्मोचनःकिञ्चनाममत् ॥ ४७ ॥ इमारुद्राय । तवसे
कपर्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेवि
श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातें । रुद्रशिवातनूः १५
शिवाविश्वाहभेषजी ॥ शिवारुतस्यभेषजीतयानोमृडजीवसे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ ४९ ॥ परिनोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥
अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृड ॥ ५० ॥ मी
ढुष्टमशिवतम । शिवोनःसुमनाभव ॥ परमेवृक्षऽआयुधन्निधाय
कृत्तिंवसानऽआचरपिनाकम्बिभ्रदागहि ॥ ५१ ॥ विकिरिद्रवि
लोहितनमस्तेऽअस्तुभगवः । यास्तेसहस्रंहेतयोन्यमस्मन्निव
पन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः ॥ तासामीशा
नोभगवःपराचीनामुखाकृधि ॥ ५३ ॥ असङ्ख्यातासहस्राणि
येरुद्राऽअधिभूम्याम् ॥ तेषाᳪसहस्रयोजनेवधन्वानितन्मसि ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० ॥ ५४ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाꣳसहस्रयोज अ०
१६ नेवधन्वानितन्मसि ॥ ५५ ॥ नीलग्ग्रीवाःशितिकण्ठादिवꣳरुद्राऽ ९
उपश्रिताः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५६ ॥
नीलग्ग्रीवाःशितिकण्ठाःशर्वाअधःक्षमाचराः ॥ तेषाꣳसहस्रयोजने
वधन्वानितन्मसि ॥ ५७ ॥ येवृक्षेषु । शष्पिञ्जरानीलग्ग्रीवा
विलोहिताः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५८ ॥ येभू
तानामधिपतयोविशिखासःकपर्द्दिनः ॥ तेषाꣳसहस्रयोजनेवध १६
न्वानितन्मसि ॥ ५९ ॥ येपथाम्पथिरक्षयऽऐलबृदाआयुर्युधः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेषाᳬसहस्रयोजुनेवुधन्वानितन्मसि ॥ ६० ॥ येतीर्त्थानिप्प्रचरं
न्तिसृकाहस्तानिषुङ्गिणः ॥ तेषाᳬसहस्रयोजुनेवुधन्वानितन्मसि
॥ ६१ ॥ येन्नेषु । विविद्ध्यान्तिपात्रेषुपिबंतोजनान् ॥ तेषाᳬसहस्र
योजुनेवुधन्वानितन्मसि ॥ ६२ ॥ यऽएतावन्तश्श्चभूयाᳬसश्श्च
दिशोरुद्द्रावितस्थिरे ॥ तेषाᳬसहस्रयोजुनेवुधन्वानितन्मसि ॥
॥ ६३ ॥ नमोस्तु ॥ रुद्द्रेब्भ्योयेदिविर्येषांवर्षमिषवः । तेब्भ्योदशप्प्रा
चीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्ध्वाः ॥ तेब्भ्योनमोऽ
अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्श्चनोद्वेष्टितमेषाञ्जम्भेद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० ध्मः ॥ ६४ ॥ नमोस्तु।रुद्रेभ्योयेन्तरिक्षेयेषांवातुऽइषवः ॥ तेभ्योदश अ०
प्प्राचीर्द्दशंदक्षिणादशंप्प्रतीचीर्द्दशोदीचीर्द्दशोर्ध्वाः ॥ तेभ्योन ६
मोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भे
दध्मः ॥ ६५ ॥ नमोस्तुरुद्रेभ्योयेपृथिव्यांयेषामन्नमिषवः ॥ ते
भ्योदशप्प्राचीर्द्दशंदक्षिणादशंप्प्रतीचीर्द्दशोदीचीर्द्दशोर्ध्वाः । तेभ्यो
नमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषा
जम्भेदध्मः ॥ ६६ ॥ इतिरुद्रेपञ्चमोऽध्यायः ॥ ५ ॥ 
हरिः ॐ वयꣳसोमव्व्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तःसचेम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हि ॥ १ ॥ एषते । रुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्र
भागऽआखुस्तेंपशुः ॥ २ ॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ य
थानोवस्यसस्करद्यथानः श्रेयसस्करद्यथानोव्यवसाययात् ॥ ३ ॥
भेषजमसि । भेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै
॥ ४ ॥ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्ध
नान्मृत्योर्म्मुक्षीयमामृतात् । त्र्यम्बकंय्यजामहेसुगन्धिम्पतिवेदन
म् ॥ उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्ते । रुद्रावसन्ते
नपरोमूजवतोतीहि ॥ अवततधन्वापिनाकावसःकृत्तिवासाऽअ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हिꣳसन्नःशिवोतीहि ॥ ६ ॥ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ अ० ७
यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ७ ॥ शिवोनामासिस्व
धितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः ॥ निवर्त्तयाम्यायुषेन्ना
द्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय ॥ ८ ॥
॥ इतिरुद्रेषष्ठोऽध्यायः ॥ ६ ॥ हरिः ॐ उग्रश्च । भीमश्चध्वा
न्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वाचविक्षिपःस्वाहा ॥ १ ॥ अग्नि
ꣳहृदयेनाशनिꣳहृदयाग्रेणपशुपतिङ्कृत्स्नहृदयेनभवंयक्ना ॥ १८
शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्येनोग्रन्देवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वनिष्ठुनावसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥ २ ॥ उग्ग्रँल्लोहितेन
मित्त्रँसौव्व्रत्येनरुद्द्रन्दौर्व्व्रत्त्येनेन्द्रम्प्प्रक्क्रीडेनमरुतोबलेनसाद्ध्यान्
प्प्रमुदा ॥ भुवस्स्यकण्ठ्यँरुद्द्रस्स्यान्तःपार्श्व्व्यम्महादेवस्स्ययकृ-
च्छर्व्वस्स्यवनिष्ठुःपशुपतेःपुरीतत् ॥३॥ लोमभ्भ्यःस्वाहा । लोमभ्भ्यः
स्वाहात्त्वचेस्वाहात्त्वचेस्वाहालोहितायस्वाहालोहितायस्स्वाहामेदो-
भ्भ्यःस्वाहामेदोभ्भ्यःस्वाहा ॥ माँसेभ्भ्यःस्वाहामाँसेभ्भ्यःस्वा-
हा स्नावभ्भ्यःस्वाहा स्नावभ्भ्यःस्वाहास्त्थभ्भ्यःस्वाहास्त्थभ्भ्यःस्वाहा
४ मज्जभ्भ्यःस्वाहामज्जभ्भ्यःस्वाहा ॥ रेतसेस्स्वाहापायवेस्वाहा ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१० आयासायस्स्वाहा । प्प्रायासायस्स्वाहा संय्यासायस्स्वाहा वियासाय अ०
स्वाहोद्यासायस्स्वाहा । शुचेस्वाहा शोचतेस्वाहा शोचमानायस्वाहा शो ८
कायस्वाहा ॥५॥ तपसेस्स्वाहा तप्यतेस्स्वाहा तप्यमानायस्स्वाहा
तप्तायस्वाहा घर्म्मायस्वाहा ॥ निष्कृत्यैस्स्वाहा प्प्रायश्चित्त्यैस्स्वाहा
भेषजायस्स्वाहा ॥६॥ यमायस्स्वाहान्तकायस्वाहा मृत्त्यवेस्स्वाहा ॥
ब्रह्मणेस्स्वाहा ब्रह्महत्त्यायैस्स्वाहा विश्श्वेब्भ्योदेवेब्भ्यस्स्वाहा द्यावापृ
थिवीब्भ्याꣳस्स्वाहा ॥७॥ इतिरुद्रेसप्तमोऽध्यायः ।७॥ हरिः ॐ वाजश्च १९
मेप्प्रसवश्चमे प्प्रयतिश्चमे प्प्रसितिश्चमे धीतिश्चमे क्क्रतुश्चमे स्वरश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेश्लोकश्चमेश्रवश्चमेश्रुतिश्चमेज्ज्योतिश्चमे स्वश्चमेयज्ञेन

कल्पन्ताम् ॥ १ ॥ प्राणश्च । मेपानश्चमेव्यानश्चमेसुश्चमेचि

त्तञ्चमऽआधीतञ्चमेवाक्चमे मनश्चमेचक्षुश्चमेश्रोत्रञ्चमेदक्षश्चमे

बलञ्चमेयज्ञेनकल्पन्ताम् ॥ २ ॥ ओजश्चमेसहश्चमऽआत्माच

मेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिचमेस्थीनिचमेपरूꣳषिचमेशरी

राणिचमऽआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ ज्ज्यैष्ठ्यञ्च

मऽआधिपत्यञ्चमे मन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाच

मेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्ष्मांचमेद्राघिमाचमेवृद्धञ्चमे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

३० वृद्धिश्च मे युज्ञेनं कल्पन्ताम् ॥ ४ ॥ सुत्यञ्चं मेश्रुद्धा चं मे जगंच्च मे धनं ३०
च मे विश्वं च मे महंश्च मे क्रीडा चं मे मोदंश्च मे जातञ्चं मे जनिष्यमाणं ८
२० च मे सूक्तञ्चं मे सुकृतञ्चं मे युज्ञेनं कल्पन्ताम् ॥ ५ ॥ ऋतञ्चं मेमृतंञ्च
मे युक्ष्मञ्च मेनामयच्च मे जीवातुश्च मे दीर्घायुत्वञ्चं मेनमित्रञ्च मेभंयं
च मे सुखञ्चं मे शयंनञ्च मे सूषा चं मे सुदिनंञ्च मे युज्ञेनं कल्पन्ताम् ॥ ६ ॥
युन्ता चं । मे धुर्ता चं मे क्षेमंश्च मे धृतिंश्च मे विश्वंञ्च मे महंश्च मे संविच्चं
मे ज्ञात्रंञ्च मे सूश्चं मे प्रसूश्चं मे सीरंञ्च मे लयंश्च मे युज्ञेनं कल्पन्ताम् ॥ २०
॥ ७ ॥ शंचं मे मयंश्च मे प्रियञ्चं मेनुकामश्चं मे कामंश्च मे सौमनुस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्चंमेभगंश्चमेद्रविणञ्चमेभद्रञ्चमेश्रेयश्चमेवसीयश्चमेयज्ञेनंकल्प
न्ताम् ॥८॥ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधुचमेस
ग्धिश्चमे सपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमेयज्ञे
नंकल्पन्ताम् ॥९॥ रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचमेप्रभु
चमे पूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेऽक्षितञ्चमेऽन्नञ्चमेऽक्षुच्चमेयज्ञेनंकल्प
न्ताम्॥१० वित्तञ्च। मेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसुगञ्चमेसुपथ्य
ञ्चमऽऋद्धञ्चमेऽऋद्धिश्चमेकॢप्तञ्चमेकॢप्तिश्चमेमतिश्चमेसुमतिश्चमे
यज्ञेनंकल्पन्ताम् ॥ ११ ॥ व्रीहयश्चमेयवाश्चमेमाषाश्चमेतिलाश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० मेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेऽणवश्चमेश्यामाकाश्चमेनी अ०
२१ वाराश्चमेगोधूमाश्चमेमसूराश्चमेयज्ञेनकल्पन्ताम् ॥ १२ ॥ अ ८
श्म्मांच । मेमृत्तिकाचमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेवन
स्पतयश्चमेहिरण्यञ्चमेयश्चमे श्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुंच
मेयज्ञेनकल्पन्ताम्॥ १३ ॥ अग्निश्च । मेऽआपश्चमेवीरुधश्च
मऽओषधयश्चमेकृष्टपच्याश्चमेऽकृष्टपच्याश्चमेग्राम्याश्चमेपश
वऽआरण्याश्चमेवित्तञ्चमेवित्तिश्चमेभूतञ्चमेभूतिश्चमे यज्ञेनकल्प २१
न्ताम् ॥ १४ ॥ वसुंच । मेवसतिश्चमेकर्म्मचमेशक्तिश्चमेऽर्थश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुऽएमंश्चमऽइन्त्याचंमेगतिश्चमेयुज्ञेनंकल्पन्ताम् ॥ १५ ॥ अग्नि
श्चं । मेऽइन्द्रश्चमेसोमंश्चमेऽइन्द्रश्चमेसवितांचंमेऽइन्द्रश्चमेसरंस्व
तीचमेऽइन्द्रश्चमेपूषाचंमेऽइन्द्रश्चमे बृहस्पतिश्चमेऽइन्द्रश्चमेयुज्ञे
नंकल्पन्ताम् ॥ १६ ॥ मित्रश्चं । मेऽइन्द्रश्चमेवरुंणश्चमेऽइन्द्रश्चमे
धाताचंमेऽइन्द्रश्चमेत्वष्टांचमेइन्द्रश्चमेमुरुतंश्चमेऽइन्द्रश्चमेविश्वे
चमेदेवाऽइन्द्रश्चमेयुज्ञेनंकल्पन्ताम् ॥ १७ ॥ पृथिवीचं । मेऽइन्द्र
श्चमेन्तरिक्षश्चमेइन्द्रश्चमेद्यौश्चंमेऽ इन्द्रश्चमेसमांश्चमेऽइन्द्रश्चमे
नक्षंत्राणिचमेऽइन्द्रंश्चमेदिशश्चमेऽइन्द्रश्चमेयुज्ञेनंकल्पन्ताम् १८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० अꣳशुश्च । मेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमऽउपाꣳशुश्चमेन्त अ०
२२ र्यामश्चमऽऐन्द्रवायवश्चमेमैत्रावरुणश्चमऽआश्विनश्चमेप्रतिप्र ८
स्थानश्चमेशुक्रश्चमेमन्थीचमेयज्ञेनकल्पन्ताम् ॥ १९ ॥ आग्रय
णश्च । मेवैश्वदेवश्चमेध्रुवश्चमेवैश्वानरश्चमऽऐन्द्राग्नश्चमेमहावै
श्वदेवश्चमे मरुत्वतीयाश्चमेनिष्कैवल्यश्चमे सावित्रश्चमेसारस्वत
श्चमेपात्नीवतश्चमेहारियोजनश्चमेयज्ञेनकल्पन्ताम् ॥ २० ॥ स्रुचश्च
मेचमसाश्चमेवायव्यानिचमेद्रोणकलशश्चमेग्रावाणश्चमेधिष २२
वणेचमेपूतभृच्चमऽआधवनीयश्चमेवेदिश्चमेबर्हिश्चमेवभृथश्चमेस्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गाकुराश्च मे यज्ञेन कल्पन्ताम् ॥२१॥ अग्निश्च । मे घर्म्मश्च मेऽर्कश्च
मे सूर्य्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे
द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥ २२ ॥
व्रतञ्च । म ऋतवश्च मे तपश्च मे संवत्सरश्च मेऽहोरात्रेऽऊर्वष्ठीवे बृहद्र
थन्तरे च मे यज्ञेन कल्पन्ताम् ॥२३॥ एका च । मे तिस्रश्च मे तिस्रश्च मे प
ञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मऽएकादश च मऽएका
दश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश
च मे सप्तदश च मे नवदश च मे नवदश च मऽएकविꣳशतिश्च मऽएक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० विꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशति अ०
२३ श्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳ ८
शतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च म एकत्रिꣳशच्च मे त्रयस्त्रि
ꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२४॥ चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश
च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च मे विꣳशतिश्च मे चतु
र्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मेऽष्टाविꣳशतिश्च मे
द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳ २३
शच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्टाचत्त्वारिꣳशच्चमेयज्ञेनकल्पन्ताम् ॥ २५ ॥ त्र्यविश्चमेत्र्यवीचमे
दित्यवाट्चमेदित्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रि
वत्साचमेतुर्यवाट्चमेतुर्यौहीचमेयज्ञेनकल्पन्ताम् २६ षष्ठवाट्च
मे षष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमे वेहच्चमे नड्वाँश्चमेधेनु
श्चमेयज्ञेनकल्पन्ताम् २७ वाजायस्वाहा।प्रसवायस्वाहापिजायस्वा
हाक्रतवेस्वाहावसवेस्वाहाहर्पतयेस्वाहाह्नेमुग्धायस्वाहामुग्धाय
वैनꣳशिनायस्वाहाविनꣳशिनऽ आन्त्यायनायस्वाहान्त्यायभौवना
यस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्रजापतयेस्वाहा ॥ इय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्तेराण्णिम्मित्रायंयन्तासियमनऽऊर्ज्जैत्वावृष्ट्यैत्वाप्प्रजानान्त्वाधिप-
त्याय ॥ २८ ॥ आयुर्य्यज्ञेनकल्पन्ताम्प्प्राणोयज्ञेनकल्पताञ्चक्षुर्य्य-
ज्ञेनकल्पताꣳश्रोत्रंयज्ञेनकल्पतांवाग्यज्ञेनकल्पताम्मनोयज्ञेन
कल्पतामात्मायज्ञेनकल्पताम्ब्रह्मायज्ञेनकल्पताञ्ज्योतिर्य्यज्ञेन
कल्पताꣳस्वर्य्यज्ञेनकल्पताम्पृष्ठंयज्ञेनकल्पतांयज्ञोयज्ञेनकल्प-
ताम् । स्तोमश्चयजुश्चऽऋक्चसामचबृहच्चरथन्तरञ्च । स्वर्द्देवाऽअग-
न्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअभूमवेट्स्वाहा ॥ २९ ॥ ॥ इति रु- २९
द्रेअष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥ ॥ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्त्रिआनुऽआपुऽओषधयःसन्तुदुर्म्मैमात्त्रियास्तस्म्मैसन्तुय्योस्म्मान्द्वे
ष्ट्रियञ्चवयन्द्विष्म्मः ॥२३॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् ॥
पश्येमशरदः÷शतञ्जीवेमशरदः÷शतᳬ शृणुयामशरदः÷शतम्प्रब्रवाम
शरदः÷शतमदीनाःस्यामशरदः÷शतम्भूयश्चशरदः÷शतात् ॥२४॥
इतिरुद्रेशान्त्याऽध्यायः ॥ ॥ ॥ ॥
॥ अथ रुद्रेस्वस्तिप्रार्थनेयमंत्राऽध्यायः ॥ ॥ हरिः÷ॐस्वस्तिनुइन्द्रो
वृद्धश्रवाःस्वस्तिनः÷पूषाविश्ववेदाः ॥ स्वस्तिनुस्तार्क्ष्योऽअरिष्टने
मिःस्वस्तिनोबृहस्पतिर्द्दधातु ॥ १ ॥ ॐ पयः÷ पृथिव्व्यामपयुऽओ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० षधीषुपयोदिव्यन्तरिक्षेपयोधाः॥पयस्वतीःप्रदिशः सन्तुमह्यम् ॥ स्व०
२७ ॥ २ ॥ ॐविष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसि
विष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्वा ॥ ३ ॥ ॐअग्निर्देव
तावातोदेवता सूर्योदेवताचन्द्रमादेवतावसवोदेवता रुद्रादेवतादि
त्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरु
णोदेवता ॥ ४ ॥ ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥
भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ ५ ॥ वामदेवायन २७
मोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमः ॥ कालायनमःकलविकर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गायुनमोबलविकरणायुनमुः ॥ ६ ॥ बलांयुनमोबलंप्रमथनायुन
मुः ॥ सर्वभूतदमनायुनमोमुनोन्मनायुनमः ॥ ७ ॥ अघोरेभ्योथु
घोरेभ्युोघोरघोरंतरेभ्यः ॥ सर्वेभ्युःसर्वशर्वेभ्युोनमंस्तेअस्तुरुद्ररूपे
भ्यः ॥ ८ ॥ तत्पुरुषायविद्महेमहादेवायंधीमहि ॥ तन्नोरुद्रःप्रचो
दयांत् ॥ ९ ॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानाम् ॥ ब्रह्माधि
पतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ १० ॥ ॐशि
वोनामांसिस्वधितिस्तेपितानमंस्तेअस्तुमामाहिंसीः ॥ निवर्त्तया
म्म्यायुंषेन्नाद्यायप्प्रजननायरायस्पोषायसुप्रजास्त्वायंसुवीर्य्याय॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रु० ॥ ११ ॥ ॐविश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽ स्व०
२८ आसुव ॥१२॥ ॐद्यौःशान्तिरन्तरिक्षꣳशान्तिः पृथिवीशान्तिरापः
शान्तिरोषधयःशान्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्र
ह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥ १३ ॥
ॐशान्तिःशान्तिःसुशान्तिर्भवतुसर्वारिष्टशान्तिर्भवतु ॥ अनेनरु
द्राभिषेककर्मणाकृतेनतेनश्रीभगवान्भवानीशंकरमहारुद्रः प्रीयतां
नमम ॥ ॐसदाशिवार्पणमस्तु ॥ इतिस्वस्तिप्रार्थनेयमंत्राऽध्यायः॥ २८

पुस्तक मिलनेका ठिकाना–खेमराज श्रीकृष्णदास, "श्रीवेंकटेश्वर" यन्त्रालय–मुम्बई.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri